# Raghuvansha 18 by Kalidas

# રઘુવંશં સર્ગઃ ૧૮ વંશાનુક્રમ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha18

File name : raghuvansha18.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : December 01, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Raghuvansha 18 by Kalidas

# રઘુવંશં સર્ગઃ ૧૮ વંશાનુક્રમ કાલિદાસકૃતમ્

સ નૈષધસ્યાર્થપતેઃ સુતાયામુત્પાદયામાસ નિષિદ્ધશત્રુઃ ।
અનૂનસારં નિષધાન્નગેન્દ્રાત્પુત્રં યમાહુર્નિષધાખ્યમેવ ॥ ૧૮-૧॥

તેનોનુવીર્યેણ પિતા પ્રજાયૈ કલ્પિષ્યમાણેન નનન્દ યૂના ।
સુવૃષ્ટિયોગાદિવ જીવલોકઃ સસ્યેન સંપત્તિફલોન્મુખેન ॥ ૧૮-૨॥

શબ્દાદિ નિર્વિશ્ય સુખં ચિરાય તસ્મિન્પ્રતિષ્ઠાપિતરાજશબ્દઃ ।
કૌમુદ્વતેયઃ કુમુદાવદાતૈર્દ્યામર્જિતાં કર્મભિરારુરોહ ॥ ૧૮-૩॥

પૌત્રઃ કુશસ્યાપિ કુશેશયાક્ષઃ સસાગરાં સાગરધીરચેતાઃ ।
એકાતપત્રાં ભુવમેકવીરઃ પુરાર્ગલાદીર્ઘભુજો બુભોજ ॥ ૧૮-૪॥

તસ્યાનલૌજાસ્તનયસ્તદન્તે વંશશ્રિયં પ્રાપ નલાભિધાનઃ ।
યો નડ્વલાનીવ ગજઃ પરેષાં બલાન્યમૃદ્નાન્નલિનાભવક્ત્રઃ ॥ ૧૮-૫॥

નભશ્ચરૈર્ગીતયશાઃ સ લેભે નભસ્તલશ્યામતનું તનૂજમ્ ।
ખ્યાતં નભઃશબ્દમયેન નામ્ના કાન્તં નભોમાસમિવ પ્રજાનામ્ ॥ ૧૮-૬॥

તસ્મૈ વિસૃજ્યોત્તરકોસલાનાં ધર્મોત્તરસ્તત્પ્રભવે પ્રભુત્વમ્ ।
મૃગૈરજર્યં જરસોપદિષ્ટમદેહબન્ધાય પુનર્બબન્ધ ॥ ૧૮-૭॥

તેન દ્વિપાનામિવ પુણ્ડરીકો રાજ્ઞામજય્યોઽજનિ પુણ્ડરીકઃ ।
શાન્તે પિતર્યાહૃતપુણ્ડરીકા યં પુણ્ડરીકાક્ષમિવ શ્રિતા શ્રીઃ ॥ ૧૮-૮॥

સ ક્ષેમધન્વાનમમોઘધન્વા પુત્રં પ્રજાક્ષેમવિધાનદક્ષમ્ ।
ક્ષ્માં લમ્ભયિત્વા ક્ષમયોપપન્નં વને તપઃ ક્ષાન્તતરશ્ચચાર ॥ ૧૮-૯॥

અનીકિનીનાં સમરેઽગ્રયાયી તસ્યાપિ દેવપ્રતિમઃ સુતોઽભૂત્ ।
વ્યશ્રૂયતાનીકપદાવસાનં દેવાદિ નામ ત્રિદિવેઽપિ યસ્ય ॥ ૧૮-૧૦॥

પિતા સમારાધનતત્પરેણ પુત્રેણ પુત્રી સ યથૈવ તેન ।
પુત્રસ્તથૈવાત્મજવત્સલેન સ તેન પિત્રા પિતૃમાન્બભૂવ ॥ ૧૮-૧૧॥

પૂર્વસ્તયોરાત્મસમે ચિરોઢામાત્મોભવે વર્ણચતુષ્ટયસ્ય ।
ધુરં નિધાયૈકનિધિર્ગુણાનાં જગામ યજ્વા યજમાનલોકમ્ ॥ ૧૮-૧૨॥

વશી સુતસ્તસ્ય વશંવદત્વાત્સ્વેષામિવાસીદ્વિષતામપીષ્ટઃ ।
સકૃદ્વિવિગ્નાનપિ હિ પ્રયુક્તં માધુર્યમીષ્ટે હરિણાન્ગ્રહીતુમ્ ॥ ૧૮-૧૩॥

અહીનગુર્નામ સ ગાં સમગ્રામહીનબાહુદ્રવિણઃ શશાસ ।
યો હીનસંસર્ગપરાઙ્મુખત્વાદ્યુવાપ્યનર્થૈર્વ્યસનૈર્વિહીનઃ ॥ ૧૮-૧૪॥

ગુરોઃ સ ચાનન્તરમન્તરજ્ઞઃ પુંસાં પુમાનાદ્ય ઇવાવતીર્ણઃ ।
ઉપક્રમૈરસ્ખલિતૈશ્ચતુર્ભિશ્ચતુર્દિગીશશ્ચતુરો બભૂવ ॥ ૧૮-૧૫॥

તસ્મિન્પ્રયાતે પરલોકયાત્રાં જેતર્યરીણાં તનયં તદીયમ્ ।
ઉચ્ચૈઃશિરસ્ત્વાજ્જિતપારિયાત્રં લક્ષ્મીઃ સિષેવે કિલ પારિયાત્રમ્ ॥ ૧૮-૧૬॥

તસ્યાભવત્સૂનુરુદારશીલઃ શિલઃ શિલાપટ્ટવિશાલવક્ષાઃ ।
જિતારિપક્ષોઽપિ શિલીમુખૈર્યઃ શાલીનતામવ્રજદીડ્યમાનઃ ॥ ૧૮-૧૭॥

તમાત્મસંપન્નમનિન્દિતાત્મા કૃત્વા યુવાનં યુવરાજમેવ ।
સુખાનિ સોઽભુઙ્ક્ત સુખોપરોધિ વૃત્તં હિ રાજ્ઞામુપરુદ્ધવૃત્તમ્ ॥ ૧૮-૧૮॥

તં રાગબન્ધિષ્વવિતૃપ્તમેવ ભોગેષુ સૌભાગ્યવિશેષભોગ્યમ્ ।
વિલાસિનીનામરતિક્ષમાઽપિ જરા વૃથા મત્સરિણી જહાર ॥ ૧૮-૧૯॥

ઉન્નાભ ઇત્યુદ્ગતનામધેયસ્તસ્યાયથાર્થોન્નતનાભિરન્ધ્રઃ ।
સુતોઽભવત્પઙ્કજનાભકલ્પઃ કૃત્સ્નસ્ય નાભિર્નૃપમણ્ડલસ્ય ॥ ૧૮-૨૦॥

તતઃ પરં વજ્રધરપ્રભાવસ્તદાત્મજઃ સંયતિ વજ્રઘોષઃ ।
બભૂવ વજ્રાકરભૂષણાયાઃ પતિઃ પૃથિવ્યાઃ કિલ વજ્રણાભઃ ॥ ૧૮-૨૧॥

તસ્મિન્ગતે દ્યાં સુકૃતોપલબ્ધાં તત્સંભવં શઙ્ખણમર્ણવાન્તા ।
ઉત્ખાતશત્રું વસુધોપતસ્થે રત્નોપહારૈરુદિતૈઃ ખનિભ્યઃ ॥ ૧૮-૨૨॥

તસ્યાવસાને હરિદશ્વધામા પિત્ર્યં પ્રપેદે પદમશ્વિરૂપઃ ।
વેલાતટેષૂષિતસૈનિકાશ્વં પુરાવિદો યં વ્યુષિતાશ્વમાહુઃ ॥ ૧૮-૨૩॥

આરાધ્ય વિશ્વેશ્વરમીશ્વરેણ તેન ક્ષિતેર્વિશ્વસહો વિજજ્ઞે ।
પાતું સહો વિશ્વસખઃ સમગ્રાં વિશ્વંભરામાત્મજમૂર્તિરાત્મા ॥ ૧૮-૨૪॥

અંશે હિરણ્યાક્ષરિપોઃ સ જાતે હિરણ્યનાભે તનયે નયજ્ઞઃ ।
દ્વિષામસહ્યઃ સુતરાં તરૂણાં હિરણ્યરેતા ઇવ સાનિલોઽભૂત્ ॥ ૧૮-૨૫॥

પિતા પિતૃણામનૃણસ્તમન્તે વયસ્યનન્તાનિ સુખાનિ લિપ્સુઃ ।
રાજાનમાજાનુવિલમ્બિબાહું કૃત્વા કૃતી વલ્કલવાન્બભૂવ ॥ ૧૮-૨૬॥

કૌસલ્ય ઇત્યુત્તરકોસલાનાં પત્યુઃ પતઙ્ગાન્વયભૂષણસ્ય ।
તસ્યૌરસઃ સોમસુતઃ સુતોઽભૂન્નેત્રોત્સવઃ સોમ ઇવ દ્વિતીયઃ ॥ ૧૮-૨૭॥

યશોભિરાબ્રહ્મસભં પ્રકાશઃ સ બ્રહ્મભૂયં ગતિમાજગામ ।
બ્રહ્મિષ્ઠમાધાય નિજેઽધિકારે બ્રહ્મિષ્ઠમેવ સ્વતનુપ્રસૂતમ્ ॥ ૧૮-૨૮॥

તસ્મિન્કુલાપીડનિભે વિપીડં સમ્યઙ્મહીં શાસતિ શાસનાઙ્કામ્ ।
પ્રજાશ્ચિરં સુપ્રજસિ પ્રજેશે નનન્દુરાનન્દજલાવિલાક્ષ્યઃ ॥ ૧૮-૨૯॥

પાત્રીકૃતાત્મા ગુરુસેવનેન સ્પષ્ટાકૃતિઃ પત્રરથેન્દ્રકેતોઃ ।
તં પુત્રિણાં પુષ્કરપત્રનેત્રઃ પુત્રઃ સમારોપયદગ્રસંખ્યામ્ ॥ ૧૮-૩૦॥

વંશસ્થિતિં વંશકરેણ તેન સંભાવ્ય ભાવી સ સખા મઘોનઃ ।
ઉપસ્પૃશન્સ્પર્શનિવૃત્તલૌલ્યસ્ત્રિપુષ્કરેષુ ત્રિદશત્વમાપ ॥ ૧૮-૩૧॥

તસ્ય પ્રભાનિર્જિતપુષ્પરાગં પૌષ્યાં તિથૌ પુષ્યમસૂત પત્ની ।
તસ્મિન્નપુષ્યન્નુદિતે સમગ્રાં પુષ્ટિં જનાઃ પુષ્ય ઇવ દ્વિતીયે ॥ ૧૮-૩૨॥

મહીં મહેચ્છઃ પરિકીર્ય સૂનૌ મનીષિણે જૈમિનયેઽર્પિતાત્મા ।
તસ્માત્સયોગાદધિગમ્ય યોગમજન્મનેઽકલ્પત જન્મભીરુઃ ॥ ૧૮-૩૩॥

તતઃ પરં તત્પ્રભવઃ પ્રપેદે ધ્રુવોપમેયો ધ્રુવસંધિરુર્વીમ્ ।
યસ્મિન્નભૂજ્જ્યાયસિ સત્યસંધે સંધિર્ધ્રુવઃ સંનમતામરીણામ્ ॥ ૧૮-૩૪॥

સુતે શિશાવેવ સુદર્શનાખ્યે દર્શાત્યયેન્દુપ્રિયદર્શને સઃ ।
મૃગાયતાક્ષો મૃગયાવિહારી સિંહાદવાપદ્વિપદં નૃસિંહઃ ॥ ૧૮-૩૫॥

સ્વર્ગામિનસ્તસ્ય તમૈકમત્યાદમાત્યવર્ગઃ કુલતન્તુમેકમ્ ।
અનાથદીનાઃ પ્રકૃતીરવેક્ષ્ય સાકેતનાથં વિધિવચ્ચકાર ॥ ૧૮-૩૬॥

નવેન્દુના તન્નભસોપમેયં શાવૈકસિંહેન ચ કાનનેન ।
રઘોઃ કુલં કુડ્મલપુષ્કરેણ તોયેન ચાપ્રૌઢનરેન્દ્રમાસીત્ ॥ ૧૮-૩૭॥

લોકેન ભાવી પિતુરેવ તુલ્યઃ સંભાવિતો મૌલિપરિગ્રહાત્સઃ ।
દૃષ્ટો હિ વૃણ્વન્કલભપ્રમાણોઽપ્યાશાઃ પુરોવાતમવાપ્ય મેઘઃ ॥ ૧૮-૩૮॥

તં રાજવીથ્યામધિહસ્તિ યાતમાધોરણાલમ્બિતમગ્ર્યવેશમ્ ।

ષડ્વર્ષદેશીયમપિ પ્રભુત્વાત્પ્રૈક્ષન્ત પૌરાઃ પિતૃગૌરવેણ ॥ ૧૮-૩૯॥

કામં ન સોઽકલ્પત પૈતૃકસ્ય સિંહાસનસ્ય પ્રતિપૂરણાય ।
તેજોમહિમ્ના પુનરાવૃતાત્મા તદ્વ્યાપ ચામીકરપિઞ્જરેણ ॥ ૧૮-૪૦॥

તસ્માદધઃ કિંચિદિવાવતીર્ણાવસંસ્પૃશન્તૌ તપનીયપીઠમ્ ।
સાલક્તકૌ ભૂપતયઃ પ્રસિદ્ધૈર્વવન્દિરે મૌલિભિરસ્ય પાદૌ ॥ ૧૮-૪૧॥

મણૌ મહાનીલ ઇતિ પ્રભાવાદલ્પપ્રમાણેઽપિ યથા ન મિથ્યા ।
શબ્દો મહારાજ ઇતિ પ્રતીતસ્તથૈવ તસ્મિન્યુયુજેઽર્ભકેઽપિ ॥ ૧૮-૪૨॥

પર્યન્તસંચારિતચામરસ્ય કપોલલોલોભયકાકપક્ષાત્ ।
તસ્યાનનાદુચ્ચરિતો વિવાદશ્ચચાલ વેલાસ્વપિ નાર્ણવાનામ્ ॥ ૧૮-૪૩॥

નિર્વૃત્તજામ્બૂનદપટ્ટશોભે ન્યસ્તં લલાટે તિલકં દધાનઃ ।
તેનૈવ શૂન્યાન્યરિસુન્દરીણાં મુખાનિ સ સ્મેરમુખશ્ચકાર ॥ ૧૮-૪૪॥

શિરીષપુષ્પાધિકસૌકુમાર્યઃ ખેદં ન યાયાદપિ ભૂષણેન ।
નિતાન્તગુર્વીમપિ સોઽનુભાવાદ્ધુરં ધરિત્ર્યા બિભરાંબભૂવ ॥ ૧૮-૪૫॥

ન્યસ્તાક્ષરામક્ષરભૂમિકાયાં કાર્ત્સ્ન્યેન ગૃહ્ણાતિ લિપિં ન યાવદ્ ।
સર્વાણિ તાવચ્છ્રુતવૃદ્ધયોગાત્ફલાન્યુપાયુઙ્ક્ત સ દણ્ડનીતેઃ ॥ ૧૮-૪૬॥

ઉરસ્યપર્યાપ્તનિવેશભાગા પ્રૌઢીભવિષ્યન્તમુદીક્ષમાણા ।
સંજાતલજ્જેવ તમાલપત્રચ્છાયાછલેનોપજુગૂહ લક્ષ્મીઃ ॥ ૧૮-૪૭॥

અનશ્નુવાનેન યુગોપમાનમબદ્ધમૌર્વીકિણલાઞ્છનેન ।
અસ્પૃષ્ટખડ્ગત્સરુણાપિ ચાસીદ્રક્ષાવતી તસ્ય ભુજેન ભૂમિઃ ॥ ૧૮-૪૮॥

ન કેવલં ગચ્છતિ તસ્ય કાલે યયુઃ શરીરાવયવા વિવૃદ્ધિમ્ ।
વંશ્યા ગુણાઃ ખલ્વપિ લોકકાન્તાઃ પ્રારમ્ભસૂક્ષ્માઃ પ્રથિમાનમાપુઃ ॥ ૧૮-૪૯॥

સ પૂર્વજન્માન્તરદૃષ્ટપારાઃ સ્મરન્નિવાક્લેશકરો ગુરૂણામ્ ।
તિસ્રસ્ત્રિવર્ગાધિગમસ્ય મૂલં જગ્રાહ વિદ્યાઃ પ્રકૃતીશ્ચ પિત્ર્યાઃ ॥ ૧૮-૫૦॥

વ્યૂહ્ય સ્થિતઃ કિંચિદિવોત્તરાર્ધમુન્નદ્ધચૂડોઽઞ્ચિતસવ્યજાનુઃ ।
આકર્ણમાકૃષ્ટસબાણધન્વા વ્યરોચતાસ્ત્રે સ વિનીયમાનઃ ॥ ૧૮-૫૧॥

અથ મધુ વનિતાનાં નેત્રનિર્વેશનીય-
મનસિજતરુપુષ્પં રાગબન્ધપ્રવાલમ્ ।
અકૃતકવિધિ સર્વાઙ્ગીણમાકલ્પજાતં

વિલસિતપદમાદ્યં યૌવનં સ પ્રપેદે ॥ ૧૮-૫૨ ॥

પ્રતિકૃતિરચનાભ્યો દૂતિસંદર્શિતાભ્યઃ
સમધિકતરરૂપાઃ શુદ્ધસંતાનકામૈઃ ।
અધિવિવિદુરમાત્યૈરાહૃતાસ્તસ્ય યૂનઃ
પ્રથમપરિગૃહીતે શ્રીભુવૌ રાજકન્યાઃ ॥ ૧૮-૫૩ ॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસ-
કૃતૌ વંશાનુક્રમો નામાષ્ટદશઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha 18 by Kalidas*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*